**वार्षिकी परीक्षा**

**आदर्शप्रश्नपत्रम्**

**(सम्पूर्ण-पाठ्यक्रम-अधिकृत्य)**

**सत्रम् - 2022-2023**

**कक्षा अष्टमी** **विषयः संस्कृतम्**

**समयः होरात्रयम्** **पूर्णांकाः100**

**प्रश्न-1. अधोलिखित-पठित-अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्। 1×5=5**

गजधरा: वास्तुकाराः आसन्। कामं ग्रामीणसमाजो भवतु नगरसमाजो वा तस्य नव-निर्माणस्य सुरक्षाप्रबन्धनस्य च दायित्वं गजधराः निभालयन्ति स्म। नगरनियोजनात् लघुनिर्माणपर्यन्तं सर्वाणि कार्याणि एतेष्वेव आधृतानि आसन्। ते योजनां प्रस्तुवन्ति स्म, भाविव्ययम् आकलयन्ति स्म, उपकरणभारान् सगृह्णन्ति स्म। प्रतिदाने ते न तद् याचन्ते स्म यद् दातुं तेषां स्वामिनः असमर्थाः भवेयुः। कार्यसमाप्तौ वेतनानि अतिरिच्य गजधरेभ्यः सम्मानमपि प्रदीयते स्म। नमः एतादृशेभ्यः शिल्पिभ्यः।

**(क)** गजधराः के आसन्?

**(ख)** योजनां के प्रस्तुवन्ति स्म?

**(ग)** गजधराः प्रतिदाने किं याचन्ते स्म?

**(घ)** गजधरेभ्यः कदा वेतनानि सम्मानं च प्रदीयते स्म?

**(ङ)** केभ्यो नमः?

**प्रश्न-2. अधोलिखित-पठित-पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्। 1×5=5**

**गुणा गुणज्ञेषु गुणा भवन्ति**
**ते निर्गुणं प्राप्य भवन्ति दोषाः।**
**सुस्वादुतोयाः प्रभवन्ति नद्यः**
**समुद्रमासाद्य भवन्त्यपेयाः।।**

**(क)** गुणाः कुत्र भवन्ति?

**(ख)** गुणाः दोषाः कदा भवन्ति?

**(ग)** सुस्वादुतोयाः काः प्रभवन्ति?

**(घ)** समुद्रमासाद्य नद्यः कीदृशाः भवन्ति?

**(ङ)** गुणज्ञेषु के भवन्ति?

**प्रश्न-3. अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्।** **5×1=5**

**(क)** सामाजिक कुरीतीनां सावित्री मुखरं विरोधम् अकरोत्। विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितैः मिलिता। फलतः केचन नापिताः अस्यां रूढौ सहभागिताम् अत्यजन् । एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म। उच्चवर्गीयाः उपहासं कुर्वन्त्यः कूपात् जलोद्धरणम् अवारयन्। सावित्री एतत् अपमान सोढुं नाशक्नोत् ।

**(ख)** मनस्यागता ते इयं भावना परमकल्याणमयी परं सर्वे न तथा अवगच्छन्ति। अस्तु, अस्ति तावदेतेषां विषये किञ्चिद् वैशिष्ट्यमपि कथनीयम्। सावहितमनसा शृणुत- जनजातिबहुलप्रदेशोऽयम्। गारो-खासी-नगा- मिजो-प्रभृतयः बहवः जनजातीयाः अत्र निवसन्ति। शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः बहुभाषाभिः समन्विताः, पर्वपरम्पराभिः परिपूरिताः, स्वलीला कलाभिश्च निष्णाताः सन्ति।

**प्रश्न-4. अधोलिखित-पद्यांशेषु कस्यचिद् द्वयोः पद्यांशयोः हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्।** **5×2=10**

**(क)** इयं शिल्पिनां यन्त्रविद्याधराणां
भिषक्शास्त्रिणां भूः प्रबन्धे युतानाम्।
नटानां नटीनां कवीनां धरेयं
क्षितौ राजते भारतस्वर्णभूमिः।।

**(ख)** यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः।
तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत्।।

**(ग)** कं सञ्जघान कृष्णः?
का शीतलवाहिनी गङ्गा?
के दारपोषणरताः?
कं बलवन्तं न बाधते शीतम्।।

**प्रश्न-5. अधोलिखित-प्रश्नेषु केषाञ्चित् पञ्च-प्रश्नानाम् उत्तराणि संस्कृत-भाषायां दीयन्ताम्।** **1×5=5**

**(क)** आर्यभट्टेन कः ग्रन्थः रचितः?

**(ख)** अत्र किं सदैव सुपूर्णमस्ति?

**(ग)** मार्गे किं दृष्ट्वा बालाः परस्परं वार्तालापं कुर्वन्ति?

**(घ)** का स्वदृढनिश्चयात् न विचलति?

**(ङ)** आत्मवशं किं भवति?

**(च)** सप्तभगिनी-प्रदेशे कः उद्योगः सर्वप्रमुखः?

**(छ)** अस्माकं देशे कति राज्यानि सन्ति?

**प्रश्न-6. अधोलिखित-प्रश्नेषु रेखाङ्कित-पदानि आधृत्य केषाञ्चित् पञ्च-वाक्यानां प्रश्ननिर्माणं कुरुत।**

**1×5=5**

**(क)** **वायुवेगः** सर्वथाऽवरुद्धः आसीत्।

**(ख)** तस्य **मूर्ध्नि** तिष्ठन्ति वायसाः।

**(ग)** सर्वाणि पत्राणि **चलदूरभाषयन्त्रे** सुरक्षितानि भवन्ति।

**(घ)** चञ्चलः **वृक्षम्** उपगम्य अपृच्छत्।

**(ङ)** **समयात्** पूर्वम् आयासं करोषि।

**(च)** **तयोः** नित्यं प्रियं कुर्यात्।

**(छ)** सावित्रीबाई **कन्याभिः** सविनोदम् आलपन्ती अध्यापने संलग्ना भवति स्म।

**प्रश्न-7. मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत-** **1×5=5**

**[एव, खलु, तथा, परितः, पुरतः]**

**(क)** विद्यालयस्य ……….. एकम् उद्यानम् अस्ति।

**(ख)** सत्यम् ……….. जयते।

**(ग)** किं भवान् स्नानं कृतवान् ………..?

**(घ)** सः यथा चिन्तयति ……….. आचरति।

**(ङ)** ग्रामं ……… वृक्षाः सन्ति।

**प्रश्न-8. संस्कृत-पाठ्यपुस्तकम् अधिकृत्य कमपि एकं श्लोकं हिन्दी-सरलार्थ-सहितम् लिख्यन्ताम्, यः श्लोकः परीक्षा-पत्रे न स्यात्।** **3+2=5**

**प्रश्न-9. संस्कृत-पाठ्यपुस्तकम् अधिकृत्य कस्याश्चित् एकस्याः कथायाः सारं हिन्दी भाषायां लिख्यताम्।**

**5×1=5**

**(क)** कण्टकेनैव कण्टकम् **(ख)** गृहं शून्यं सुतां विना

**प्रश्न-10. शब्दानां यथानिर्दिष्ट-शब्दरूपं प्रदत्त-विकल्पेभ्यः चिनुत।** **1×5=5**

**(क) गणेश शब्दः, चतुर्थी विभक्तिः, एकवचनम्।**

(1) गणेशाय (2) गणेशात् (3) गणेशस्य (4) गणेशेन

**(ख) सीता शब्दः, षष्ठी विभक्तिः, द्विवचनम्।**

(1) सीतासु (2) सीतायाः (3) सीतानाम् (4) सीतयोः

**(ग) अस्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्।**

(1) अस्मान् (2) आवाम् (3) वयम् (4) अहम्

**(घ) नदी शब्दः, सप्तमी विभक्तिः, एकवचनम्।**

(1) नद्यः (2) नद्याम् (3) नद्याः (4) नदीषु

**(ङ) मातृ शब्दः, तृतीया विभक्तिः, बहुवचनम्।**

(1) मातरम् (2) मातृभ्याम् (3) मातृभिः (4) मातृभ्यः

**प्रश्न-11. धातूनां यथानिर्दिष्ट-धातुरूपं प्रदत्त-विकल्पेभ्यः चिनुत। 1×5=5**

**(क) भू धातुः,लट्-लकारः,उत्तम-पुरुषः,एकवचनम्।**

(1) भवामि (2) भवति (3) भवसि (4) भवामः

**(ख) दृश् धातुः,लृट्-लकारः,मध्यम-पुरुषः,बहुवचनम्।**

(1) द्रक्ष्यथ: (2) पश्यथ (3) द्रक्ष्यथ (4) पश्यथः

**(ग) गम् धातुः,लङ्-लकारः,प्रथम-पुरुषः,बहुवचनम्।**

(1) अगच्छम् (2) अगच्छन् (3) अगच्छत् (4) अगच्छत

**(घ) स्था धातुः,लोट्-लकारः,उत्तम-पुरुषः,द्विवचनम्।**

(1) स्थास्याव (2) तिष्ठाम (3) स्थास्याम (4) तिष्ठाव

**(ङ) लिख् धातुः,विधिलिङ्-लकारः,मध्यम-पुरुषः, एकवचनम्।**

(1) लिख (2) लिखेः (3) अलिखः (4) लिखसि

**प्रश्न-12. प्रदत्त-विकल्पेभ्यः समुचितं विकल्पं विचित्य सन्धि/सन्धिविच्छेद-पदं वा चिनुत। 1×5=5**

**(क) बिभ्रन्न**

(1) बि+भ्रन्न (2) बिभ्रत्+न (3) बिभ्रन्+न (4) बिभ्र+न्न

**(ख) बहिः+आगत्य**

(1) बहिरागत्य (2) बहागत्य (3) बहिआगत्य (4) बहिर्रागत्य

**(ग) एतेष्वेव**

(1) एतेष्+एव (2) एते+ष्वेव (3) एतेषु+एव (4) एतेष्+वेव

**(घ) विनय+उपेता**

(1) विनायेपता (2) विनयउपेता (3) विनयेपेता (4) विनयोपेता

**(ङ) प्रवृत्तोऽपि**

(1) प्रवृत्तः+पि (2) प्र+वृतः+ऽपि (3) प्रवृत्तः+अपि (4) प्रवृत्तो+पि

**प्रश्न-13. प्रदत्त-विकल्पेभ्यः सङ्ख्यात्मक-अङ्कानां कृते समुचित-संस्कृत-पदं चिनुत। 1×5=5**

**(क) 25**

(1) पञ्चविंशतिः (2) पञ्चदश (3) पञ्चत्रिंशत् (4) पञ्चचत्वारिंशत्

**(ख) 58**

(1) अष्टषष्टिः (2) अष्टपञ्चाशत् (3) अष्टचत्वारिंशत् (4) अष्टत्रिंशत्

**(ग) 89**

(1) अष्टाशीतिः (2) नवनवतिः (3) अष्टनवतिः (4) नवाशीतिः

**(घ) 11**

(1) एकाएक (2) एकदश (3) एकादश (4) एकविंशतिः

**(ङ) 73**

(1) त्रीसप्ततिः (2) त्रिसप्ततिः (3) त्रीषष्टिः (4) त्र्यशीतिः

**प्रश्न-14. प्रकृतिप्रत्यययोः विभागं संयोजनं वा कृत्वा समुचित-पदं प्रदत्त-विकल्पेभ्यः चिनुत। 1×5=5**

**(क) कर्तुम्**

(1) कर्+तुम् (2) कृ+तुमुन् (3) क्री+तुमुन् (4) क्रि+तुमुन्

**(ख) सम्+पूज्+ल्यप्**

(1) सम्पूज्य (2) समपूज्य (3) सम्पूजय (4) सम्पूज्यप्

**(ग) त्यक्त्वा**

(1) त्यज्+त्वा (2) त्यक्+त्वा (3) त्यज्+क्त्वा (4) त्यक्+क्त्वा

**(घ) दृश्+तुमुन्**

(1) दर्शितुम् (2) दर्शतुम् (3) दृष्टुम् (4) द्रष्टुम्

**(ङ) करणीयम्**

(1) कृ+अनीयर् (2) कर्+अनीयर् (3) कर्+अनीयम् (4) कृ+अनीयम्

**प्रश्न-15. अधोलिखित-पदानां समुचितं पदपरिचयं प्रदत्तेभ्यः विकल्पेभ्यः चिनुत। 1×5=5**

**(क) "अभवत" इत्यस्य पद-परिचयम्-**

(1) भू धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्

(2) भू धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्

(3) भव् धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्

(4) भव् धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्

**(ख) "मात्रा" इत्यस्य पद-परिचयम्-**

(1) मातृ शब्दः, तृतीया विभक्तिः, एकवचनम्

(2) मातृ शब्दः, चतुर्थी विभक्तिः, एकवचनम्

(3) मातृ शब्दः, द्वितीया विभक्तिः, एकवचनम्

(4) मातृ शब्दः, पञ्चमी विभक्तिः, एकवचनम्

**(ग) "सेवते" इत्यस्य पद-परिचयम्-**

(1) सेव् धातोः, लट्लकारः, उत्तम-पुरुषः, एकवचनम्

(2) सेव् धातोः, लट्लकारः, मध्यम-पुरुषः, एकवचनम्

(3) सेव् धातोः, लट्लकारः, प्रथम-पुरुषः, बहुवचनम्

(4) सेव् धातोः, लट्लकारः, प्रथम-पुरुषः, एकवचनम्

**(घ) "लताः" इत्यस्य पद-परिचयम्-**

(1) लता शब्दः, तृतीया विभक्तिः, बहुवचनम्

(2) लता शब्दः, तृतीया विभक्तिः, बहुवचनम्

(3) लता शब्दः, तृतीया विभक्तिः, बहुवचनम्

(4) लता शब्दः, तृतीया विभक्तिः, बहुवचनम्

**(ङ) द्रक्ष्यामः इत्यस्य पद-परिचयम्-**

(1) दृश् धातोः, लृट्लकारः, उत्तम-पुरुषः, बहुवचनम्

(2) दृश् धातोः, लट्लकारः, उत्तम-पुरुषः, बहुवचनम्

(3) दृश् धातोः, लृट्लकारः, उत्तम-पुरुषः, द्विवचनम्

(4) दृश् धातोः, लृट्लकारः, उत्तम-पुरुषः, एकवचनम्

**प्रश्न-16. यथानिर्दिष्टं लकार-परिवर्तनं कृत्वा प्रदत्तेभ्यः विकल्पेभ्यः समुचितं विकल्पं चिनुत। 1×5=5**

**(क) अहम् गच्छामि। (लङ्लकारे)**

(1) अहम् गच्छानि (2) अहम् गमिष्यामि (3) अहम् अगच्छम् (4) अहम् गच्छेयम्

**(ख) ते गायन्तु। (लृट्लकारे)**

(1) ते गास्यन्ति (2) ते गायन्ति (3) ते अगायन् (4) ते गायेयुः

**(ग) यूयम् स्थास्यथ। (लोट्लकारे)**

(1) यूयम् तिष्ठथ (2) यूयम् तिष्ठत (3) यूयम् अतिष्ठत (4) यूयम् तिष्ठेत

**(घ) आवाम् अपश्याव। (लट्लकारे)**

(1) आवाम् द्रक्ष्याव: (2) आवाम् पश्याव (3) आवाम् पश्येव (4) आवाम् पश्यावः

**(ङ) त्वम् पिबसि। (लृट्लकारे)**

(1) त्वम् पास्यसि (2) त्वम् अपिबः (3) त्वम् पिब (4) त्वम् पिबेः

**प्रश्न-17. प्रदत्त-विकल्पेभ्यः निर्देशानुसारं समुचितं विकल्पं चिनुत। 1×5=5**

**(क) संस्कृते कति कारकाणि सन्ति?**

(1) पञ्च (2) त्रीणि (3) षट् (4) सप्त

**(ख) "अधिकरण" कारके का विभक्तिः?**

(1) तृतीया (2) सप्तमी (3) पञ्चमी (4) चतुर्थी

**(ग) "यूयम्" इति पदस्य कः अर्थः?**

(1) तुम दोनों (2) हम दोनों (3) हम सब (4) तुम सब

**(घ) संस्कृत-पाठ्यपुस्तकस्य अष्टम पाठस्य नाम किम्?**

(1) संसारसागरस्य नायकाः (2) सप्तभगिन्यः (3) भारत जनताऽहम् (4) नीति-नवनीतम्

**(ङ) "आगम्य" इत्यत्र उपसर्गं पृथक् कुरुत।**

(1) आ+गम्य (2) आग+म्य (3) आगम्+य (4) आग्+अम्य

**प्रश्न-18. यथानिर्दिष्टं प्रश्नानाम् उत्तराणि लिख्यताम्।**

**(क) अधोलिखित-विशेषणविशेष्यानाम् उचित-मेलनं कुरुत।** ½×4= 2

(क) मौखिकम् उपकारः

(ख) महान् भारते

(ग) मुद्राविहीनः ज्ञानम्

(घ) सम्पूर्णे विनिमयः

**(ख) अधोलिखित-पदेषु भिन्न-प्रकृतिकं पदं चिनुत।** ½×4= 2

(क) गच्छति, पठति, धावति, अहसत्, क्रीडति।

(ख) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः।

(ग) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्।

(घ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा।

**(ग) अधोलिखित-विलोम-पदानाम् उचित-मेलनं कुरुत।** ½×4= 2

(क) वीरः शान्ता

(ख) अशान्ता तत्रैव

(ग) मूर्खैः कातरः

(घ) अत्रैव विद्वद्भिः

**(घ) अधोलिखित-समानार्थक-पदानाम् उचित-मेलनं कुरुत।** ½×4= 2

(क) जगति पृथ्वीम्

(ख) प्रकृतिः नेत्रेण

(ग) चक्षुषा स्वभावः

(घ) वसुन्धराम् संसारे

**(ङ) अधोलिखित-तद्भव-पदानाम् कृते संस्कृत-पदानि लिखत।** ½×4= 2

(क) कड़वा ………..

(ख) लोभी: ………..

(ग) तिनका ………..

(घ) मधुमक्खी ………..